अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ..........................

Paper Code
MAS 104

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**

**एम.ए. संस्कृतम्, (सत्रम् : प्रथमम्)**
**काव्यं नाटकं च**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्ड-क
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्ना एव समाधेयाः। **(3×15=45)**

1. 'बुद्धचरितम्' इति पुस्तकस्य प्रथमसर्गस्य प्रतिपाद्यविषयं विस्तारेण वर्णनीयम्।
2. 'दूतवाक्यम्' इति पुस्तकस्य प्रथमांकस्य किं स्वरूपं इति विस्तारेण लेखनीयम्।
3. 'बालचरितम्' इति पुस्तकस्य विषय-वस्तु किं वर्तते? विस्तारेण लिखन्तु।
4. 'हंससन्देशस्य' लेखकस्य संपेक्षण परिचयं लिखन् 'प्रथमाश्वासस्य' प्रारम्भिकानां पंचत्रिंशत्-श्लोकानां विषय-वस्तु वर्णनीयम्।
5. 'दूतवाक्यम्' इति पुस्तकस्य पात्राणां नामोल्लेखनं परिचयं च संक्षेपण संस्कृतभाषायां लेखनीयम्।

## खण्ड-ख
**(लघूत्तरीयप्रश्नाः)**

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. सप्रसंगेन श्लोकव्याख्या करणीया -
   दीप्त्या च धैर्येण च यो रराज बालो रविर्भूमिमिवावतीर्णः।
   तथातिदीप्तोऽपि निरीक्ष्यमाणो जहार चंक्षुषि यथा शशाङ्कः।।
2. सप्रसंगेन श्लोकव्याख्या करणीया -
   ततो नृपस्तं मुनिमासनस्थं पाद्यार्घ्यपूर्वं प्रतिपूज्य सम्यक्।
   निमन्त्रयामास यथोपचारं वसिष्ठं स इवान्तिदेवः।।
3. छन्दोऽलंकारसहितं श्लोकव्याख्या करणीया -
   प्राप्तः किलाद्य वचनादिह पाण्डवानां,
   दौत्येन भृत्य इव कृष्णमतिः स कृष्णः।
   श्रोतुं सखे ! त्वमपि सज्जय कर्ण ! कर्णौ,
   नारीमृदूनिवचनानि युधिष्ठरस्य।।
4. केषाञ्चित् पञ्चालंकाराणां संक्षेपण परिचयं लिखन्तु।
5. ससन्दर्भेण श्लोकव्याख्या करणीया -
   नानारत्नैरूपवितगुणां नित्यसङ्गीतनादां,
   भूमेर्द्रक्ष्यस्युचितविभवं भूषणं तत्र काञ्चीम्।
   यस्यां नित्यं निहितनयनो हस्तिशैलाधिवासी,
   द्वन्द्वातीतरस्स खलु पुरूषो दृश्यते सत्यकामः।।

6. ससन्दर्भेण श्लोकव्याख्या करणीया -
गिरितटकठिनांसौ बाहू ममैतो,
प्रहरणमपरं तु त्वादृशां दुर्बलानाम्।
अथ मम भुजदण्डैः पीड्यमानश्च शीघ्रं,
यदि न पतसि भूमौ नास्मि दामोदरोऽहम्॥

## खण्ड-ग
## (अतिलघूत्तरीयाः प्रश्नाः)

निर्देशः 'ग' खण्डे दशलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितो वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति। **(10×0.5=05)**

1. 'बालचरितम्' कस्य कृतिरस्ति ?
   (अ) कालिदासस्य (ब) घोषस्य
   (स) भासस्य (द) भवभूतेः
2. कृष्णस्य जन्म कुत्र अभवत् ?
   (अ) मथुरायाम् (ब) आभीरग्रामे
   (स) वृन्दावने (द) आगरायाम्
3. 'बुद्धचरितम्' कस्य रचना वर्तते ?
   (अ) भवभूतेः (ब) कालिदासस्य
   (स) अश्वघोषस्य (द) भासस्य
4. बुद्धस्य मातुः नाम किम् ?
   (अ) कौशल्या (ब) माया
   (स) देवकी (द) कैकेयी
5. शुद्धोदनः कस्य वंशस्य भूपतिरासीत् ?
   (अ) इक्ष्वाकुवंशस्य (ब) भारद्वाजवंशस्य
   (स) रघुवंशस्य (द) यदुवंशस्य
6. 'दूतवाक्यम्' इत्यस्य व्याख्याकारः कोऽस्ति ?
   (अ) आचार्यविङ्कटनाथः (ब) सूर्यनारायणः
   (स) श्रीरामजीमिश्रः (द) आचार्यबालकृष्णः
7. 'बालचरितम्' इत्यस्मिन् कति अंकाः वर्तन्ते ?
   (अ) चत्वारः (ब) पञ्च
   (स) षट् (द) त्रयः
8. 'दूतवाक्ये' कयोः द्वयोः पात्रयोः मध्ये संवादः प्रचलति?
   (अ) कृष्ण-दुर्योधनयोः (ब) दुर्योधन-बादरायणयोः
   (स) कृष्ण-धृतराष्ट्रयोः (द) कृष्ण-बादरायणयोः
9. 'हंससन्देशस्य' प्रणेता कः ?
   (अ) अश्वघोषः (ब) भासः
   (स) आचार्यबालकृष्णः (द) आचार्यविङ्कटनाथः
10. रामसीतयोः वियोगावस्थायाः वर्णनं कस्मिन् ग्रन्थे वर्तते ?
   (अ) दूतवाक्ये (ब) मेघदूते
   (स) हंससन्देशे (द) अभिज्ञानशाकुन्तले

--------------x--------------